# MA 1st Semester Examination, 2010

## SANSKRIT

PAPER—SAN-102

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

1. ऋग्वेदस्य प्राथम्येऽपि यजुर्वेदस्यादौ व्याख्यानस्य कारणं सायणाचार्यदिशा प्रतिपाद्यताम् । 10

*अथवा*

मन्त्रभागस्य प्रामाण्यं पूर्वोत्तरपक्षपुरस्सरं सायणदिशा प्रतिपाद्यताम् ।

2. उपनिषच्छब्दस्य कोऽर्थः ? उपनिषच्छब्देन कथं ग्रन्थस्य ग्रहणं भवति ? कठोपनिषदि नचिकेतसा प्रार्थितस्य तृतीयवरस्वरूपं विचार्यताम् । 2 + 2 + 6

*अथवा*

अधोलिखितेषु कश्चित् द्वयोः देवनागरीलिपिं व्यवहृत्य संस्कृतभाषया सप्रसङ्गव्याख्यां कुरुत — 5 × 2

(*a*) न वित्तेन तर्पणीयो मनुष्यो
लप्स्यामहे वित्तमद्राक्ष्म चेत् त्वा ।
जीविस्यामो यावदीशिष्यसि त्वं
वरस्तु मे वरणीयः स एव ॥

(*b*) श्रेयश्च प्रेयश्च मनुस्यमेतस्तौ
सम्परीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते
प्रेयो मन्दो योगक्षेमानुवृणीते ॥

(*c*) आशाप्रतीक्षे सङ्गतं सूनृतां चेष्टा-
पूर्ते पुत्रपशूँश्च सर्वान् ।
एतद् वृङ्क्ते पुरुषस्याल्पमेधसो
यस्यानश्नन् वसति ब्राह्मणो गृहे ।

**3.** अधोलिखितेषु निरुक्तपंक्तिषु किमपि <u>द्वयं</u> यास्कदिशा व्याख्यायताम्— $7 \times 2$

(*i*) व्याप्तिमत्वात् तु शब्दस्य।

(*ii*) उच्चावचेस्वर्थेषु निपतन्ति इति निपाताः।

(*iii*) ते निगन्तव एव सन्तो निगमनात् निघण्टव उच्यन्ते।

(*iv*) भावप्रधानमाख्यातम्! सत्वप्रधानानि नामानि।

**4.** यास्काचार्यमनुसृत्य अधोलिखितेषु कस्यापि पदद्वितयस्य निर्वचनं <u>देवनागरीलिपिं</u> व्यवहृत्य संस्कृतभाषया क्रियताम्— $2 \times 3$

जातवेदस्, आदित्यः, समुद्रः, मेघः।